# अनघा व्रत कल्पः

(कोटि अनघा व्रत प्रति)

श्री महागणाधिपतये नमः ।

श्री महासरस्वत्यै नमः ।

श्री गणपति सच्चिदानंद सद्गुरुभ्यो नमः ।

**हरिः ओम् ।।**

ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोपि वा ।

यःस्मरेत् पुंडरीकाक्षं सबाह्याभ्यंतरः शुचिः ।।

पुंडरीकाक्ष पुंडरीकाक्ष पुंडरीकाक्ष ।।

ॐ आचम्य – ॐ केशवाय नमः, ॐ नारायणाय नमः, ॐ माधवाय नमः, ॐ गोविंदाय नमः, ॐ विष्णवे नमः, ॐ मधुसूदनाय नमः, ॐ त्रिविक्रमाय नमः, ॐ वामनाय नमः, ॐ श्रीधराय नमः, ॐ हृषीकेशाय नमः, ॐ पद्मनाभाय नमः, ॐ दामोदराय नमः, ॐ संकर्षणाय नमः, ॐ वासुदेवाय नमः, ॐ प्रद्युम्नाय नमः, ॐ अनिरुद्धाय नमः, ॐ पुरुषोत्तमाय नमः, ॐ अधोक्षजाय नमः, ॐ नारसिंहाय नमः, ॐ अच्युताय नमः, ॐ जनार्दनाय नमः, ॐ उपेंद्राय नमः, ॐ हरये नमः, ॐ श्रीकृष्णाय नमः, ॐ श्रीकृष्ण परब्रह्मणे नमो नमः ।।

उत्तिष्ठन्तु भूतपिशाचाः एते भूमि भारकाः ।

एतेषामविरोधेन ब्रह्मकर्म समारभे।।

**<u>प्राणायाम मंत्रः</u>**

दत्तात्रेयाय विद्महे अत्रिपुत्राय धीमहि । तन्नो दत्तः प्रचोदयात् ।।

**संकल्पः** - ममोपात्त समस्त दुरित क्षय द्वारा श्री परमेश्वर प्रीत्यर्थं, शुभे शोभने मुहूर्ते, श्री महाविष्णोराज्ञया, प्रवर्तमानस्य, अद्य ब्रह्मणः, द्वितीय परार्धे, श्वेतवराहकल्पे, वैवस्वत मन्वन्तरे, कलियुगे, प्रथमपादे, जंबूद्वीपे, भरतवर्षे, भरतखंडे, अस्मिन् वर्तमान व्यावहारिक चांद्रमानेन, प्रभवादि षष्टि संवत्सराणां मध्ये..... संवत्सरे.... अयने....... ऋतौ..... मासे..... पक्षे....... तिथौ...... वासरे........ शुभनक्षत्रे, शुभयोगे, शुभकरणे, एवंगुण विशेषण विशिष्टायां अस्यां शुभतिथौ श्री परमेश्वर प्रीत्यर्थं, श्री अनघा लक्ष्मी समेत श्री अनघ स्वामि प्रसाद सिद्ध्यर्थं, भक्ति ज्ञान वैराग्य योगानां निरन्तराभिवृद्ध्यर्थं, सद्गुरु कृपाकटाक्ष सिद्ध्यर्थं, श्री सद्गुरु आज्ञानुसारेण श्री अनघा व्रताख्यं कर्म करिष्ये ।।

**<u>कलशपूजा</u>**

तदंग कलशाराधनं करिष्ये ।

कलशस्य मुखे विष्णुः कंठे रुद्र स्समाश्रितः ।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृ गणाः स्मृताः ।।

कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुंधरा।

ऋग्वेदोऽथ यजुर्वेद स्सामवेदो ह्यथर्वणः ।।

अंगैश्च सहितास्सर्वे कलशांबु समाश्रिताः ।

आयांतु देव पूजार्थं दुरितक्षय कारकाः ।।

गंगे च यमुने कृष्णे गोदावरि सरस्वति ।

नर्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।

कलशोदकेन पूजा द्रव्याणि संप्रोक्ष्य, देवं, आत्मानं च संप्रोक्ष्य,

**<u>कलश स्थापन विधिः</u>**

आदौ कल्पोक्त विधानेन तत्तद्देवताऽऽवाहनं प्राणप्रतिष्ठापनं च करिष्ये ।।

**<u>महागणपति प्रार्थनम्</u>**

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

**<u>अष्टसिद्धयः</u>** –

अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।

ईशित्वं च वशित्वं च यच्च कामावसायिता ।।

1 **<u>अणिमा</u>** –

अणोरणीयसः पुत्र ईशानाशा व्यवस्थितः ।

अनघस्याणिमाभिख्यः पुत्रश्चित्रस्सनोऽवतु ।।

अष्टदळपद्मे ईशान्य दळे कलशे अणिम देवता मावाहयामि स्थापयामि पूजयामि।।

2 **<u>लघिमा</u>** –

अनघाऽनघयोः पुत्रो लघिमाख्यः कृपाऽलघुः ।

देवस्याऽऽग्नेय कोणस्थो लघुबुद्धि स्सनोऽवतु ।।

अष्टदळपद्मे आग्नेय दळे कलशे लघिम देवता मावाहयामि स्थापयामि पूजयामि।।

3 **<u>प्राप्तिः</u>** -

भक्ताभीष्ट फल प्राप्ति कारकोऽनघयोस्सुतः ।

देवस्य नैर्ऋते कोणे स्थितः प्राप्तिः सनोऽवतु ।।

अष्टदळपद्मे नैर्ऋत दळे कलशे प्राप्ति देवता मावाहयामि स्थापयामि पूजयामि ।।

**4 <u>प्राकाम्यम्</u>** –

अवधूत गुरोस्स्वेच्छा संचारस्यानघस्य यः ।
वायुकोण स्थितः पुत्रः प्राकाम्याऽऽख्य स्सनोऽवतु ।।

अष्टदळपद्मे वायव्यदळे कलशे प्राकाम्य देवता मावाहयामि स्थापयामि पूजयामि ।।

**5 <u>ईशित्वम्</u>** -

सर्वातिशायितां देवस्यानघस्य जगद्गुरोः ।
ख्यापयन् दक्षभागस्थ ईशित्वाऽऽख्य स्सनोऽवतु ।।

अष्टदळपद्मे देवस्य दक्षिण भागस्थ दळे कलशे ईशित्व देवता मावाहयामि स्थापयामि पूजयामि ।।

**6 <u>वशित्वम्</u>** –

जगद्यस्य वशे तिष्ठत्यनघस्य महाऽऽत्मनः ।
आत्मजो वामभागस्थो वशित्वाऽऽख्य स्सनोऽवतु ।।

अष्टदळपद्मे देवस्य वामभागस्थदळे कलशे वशित्व देवता मावाहयामि स्थापयामि पूजयामि ।।

**7 <u>कामावसायिता</u>** –

कामावसायिताऽभिख्यो ह्यनघस्यांगरक्षवत् ।
पश्चाद्भागस्थितः पुत्रः कमनीय स्सनोऽवतु ।।

अष्टदळपद्मे देवस्य पश्चाद्भागस्थ दळे कलशे कामावसायिता देवता मावाहयामि स्थापयामि पूजयामि ।।

8 **<u>महिमा</u>**

पुरस्ता दनघ द्वन्द्व पाद सीम्नि व्यवस्थितः ।

महिमाऽऽख्यो महा कार्य - कारी पुत्र स्सनोऽवतु ।।

अष्टदळपद्मे देवस्य पुरस्ता द्दळे कलशे महिम देवता मावाहयामि स्थापयामि पूजयामि ।।

9 **<u>दत्तात्रेयः</u>** –

एवं तत्तत्सुत भ्राज द्दळाष्टक सुशोभिनः ।

कर्णिकायां पङ्कजस्य कलितायां महागुणैः ।।

समासीनः प्रशान्तात्मा कृपाब्धि रनघाऽऽह्वयः ।।

दत्तात्रेयो गुरु र्विष्णु र्ब्रह्मेशाऽऽत्मा सनोऽवतु ।।

अष्टदळपद्मे मध्ये कर्णिकायां प्रधानदेवतां श्रीमदनघ स्वामिनमावाहयामि स्थापयामि पूजयामि ।।

10 **<u>अनघालक्ष्मीः</u>**

अनघस्वामिनः पार्श्वे समासीना कृपालया ।

सर्वै र्ब्राह्म गुणै र्युक्ता योगाधीशा जगत्प्रसूः ।।

पद्माऽऽसना पद्मकरा भक्ताधीना पतिव्रता ।

अनघाऽम्बा महालक्ष्मी र्महाभागा च नोऽवतु ।।

अष्टदळपद्मे मध्ये कर्णिकायां श्रीमदनघस्वामिनः पार्श्वे श्रीमतीं, अनघालक्ष्मी मावाहयामि स्थापयामि पूजयामि.

**प्राणप्रतिष्ठा**

ईशान्या मणिमाभिख्ये चाग्नेय्यां लघिमाभिधे ।

प्राप्ति नामनि नैर्ऋत्यां प्राकाम्याऽऽख्येऽनिल स्थले ।।

ईशित्वाख्ये वशित्वाख्ये चोभयोः पार्श्वयो रपि ।

कामावसायिता नाम्नि पश्चाद्भागेंग रक्षवत् ।।

महिम्नि पादमूले च दलेष्वष्टसु नित्यशः

भ्राजमानेषु तन्मध्ये कर्णिकायां कृताऽऽलयौ ।

अनघ श्चानघा देवी प्राण चेष्टा विराजितौ ।

चरतां मम हृत्पद्मे गुरु मार्ग प्रवर्तकौ ।।

अणिमादि, अंग देवता परिवृत श्री अनघालक्ष्मी समेत श्री अनघस्वामिने नमः। सर्वेंद्रियाणि वाङ्मनश्चक्षु श्श्रोत्र जिह्वा घ्राण रेतो बुध्यादीनि इहैवाऽऽगत्य, स्वस्तये सुखं चिरं तिष्ठन्तु स्वाहा । प्राण प्रतिष्ठापन मुहूर्त स्सुमूहूर्तोऽस्तु ।। स्वामिन् स्थिरो भव । वरदो भव । सुमुखो भव । सुप्रसन्नो भव । स्थिरासनं कुरु ।।

स्वामिन् सर्व जगन्नाथ यावत्पूजा ऽवसानकम् ।

तावत्त्वं प्रीतिभावेन यंत्रे (कुम्भे)ऽस्मिन् सन्निधिं कुरु ।।

**ध्यानम्**

पद्मासनोत्तान मनोज्ञपादं पद्मं दधानं न भयञ्च पाण्योः ।

योगस्थिरं निर्भर कान्ति पुञ्जं दत्तं प्रपद्येऽनघ नामधेयम् ।।

पद्मासनस्थां पदयुग्म नूपुरां पद्मं दधानामभयञ्च पाण्योः।

योगेऽर्थ सम्मीलित निश्चलाक्षीं दत्तानुरक्ता मनघां प्रपद्ये ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः । ध्यायामि ध्यानं समर्पयामि ।।

**आवाहनम्**

गुणातीतावपि स्वेषु कृपया त्रिगुणान्वितौ ।

अनघा मनघं देवं देवीञ्चाऽऽवाहयाम्यहम् ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः। आवाहयामि ।

**आसनम्**

सौवर्ण पीठं कृष्णत्वक् चित्रासन कुशाऽऽसनैः ।

आस्तृतं गृह्यतां देवा - वनघा वर्पितं मया ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः।आसनं परिकल्पयामि।

**पाद्यम्**

योगिशीर्षेऽ मृतासारौ जम्भशीर्षेऽग्नि वर्षकौ ।

पादौ पाद्येन हृद्येन क्षाळयेऽनघयो रहम् ।।

श्री अनघा लक्ष्मी समेत श्री अनघस्वामिने नमः। पाद्यं समर्पयामि ।।

**अर्घ्यम्**

पद्मेन मालया चात्तौ भक्ताभीति प्रदायकौ ।

अर्घ्येण शीतलीकुर्या – मनघाऽनघयोः करौ ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः। अर्घ्यं समर्पयामि ।।

**आचमनम्**

ज्ञानज्योति र्विनीतानां वेदज्योतिश्च वेधसः ।

यतोऽनघ मुखा द्व्यक्तं तत्राऽऽचमन मर्पितम् ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः। आचमनीयं समर्पयामि ।।

**मधुपर्कः**

अनघौ यौ श्रित परीक्षार्थं माया मधुस्पृशौ ।

मधुपर्कं ददे ताभ्यां तत्पादाब्ज मधुव्रतः ।।

श्री अनघा लक्ष्मी समेत श्री अनघस्वामिने नमः। मधुपर्कं समर्पयामि।

**पञ्चामृत स्नानम्**

यौ कृपाप्रेरितौ भक्त प्रपंचेमृत वर्षकौ ।

पञ्चामृतै स्तौ स्नपया म्यनघा वमृताऽऽत्मकौ ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः। पंचामृत स्नानं समर्पयामि

**स्नानम्**

मातृतीर्थात् पद्मतीर्थात् सर्व तीर्थादनेकतः ।

समानीतै श्शीतलोदै स्स्नपया म्यनघा वुभौ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः। शुद्धोदक स्नानं समर्पयामि।।

**वस्त्रम्**

वल्कले रुचिरे सूक्ष्मे चित्र चित्र दशाऽञ्चिते ।

मायाऽऽवृति च्छेदकाभ्या मनघाभ्यां ददे मुदा ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः। वस्त्रं समर्पयामि।

**उपवीतम्**

उपवीतं पवित्रं च सहजं यत्प्रजापतेः ।

समर्पितं मया शुभ्र मनघौ प्रतिमुञ्चतम् ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः। उपवीतं समर्पयामि।

**गन्धः**

मिलत्कर्पूर सद्गन्धै रनुलिप्या नघाऽनघौ ।

मुखयो रलिके कुर्यां लसत्फालाक्षि सन्निभे ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः। गन्धान् धारयामि।

गन्धस्योपरि अलंकरणार्थं कुंकुमं - अक्षतांश्च समर्पयामि ।

**मंगळ द्रव्याणि**

आर्द्रां हरिद्रां पदयो - र्मुखे पुष्परजोऽनघे ।

सीमन्त सीम्नि सिन्दूरं तेऽर्पये मङ्गळप्रदे ।।

श्री अनघा लक्ष्म्यै नमः। मंगळ द्रव्याणि समर्पयामि।

**आभरणम्**

शीर्षे कण्ठे बाहुयुग्मे मणिबन्ध द्वये तथा ।

विविधा अक्षमालास्ते भूषार्थं कल्पयेऽनघ ।।

पादांगुळीय कटक कांची मांगल्य हारकान् ।

कंकणं नासिका भूषां ताटङ्के ते ददेऽनघे ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः । आभरणानि समर्पयामि ।।

**पुष्पम्**

तत्तत्कालोत्थ पुष्पौघ मालाभि रनघाऽनघौ ।

आपाद शीर्षं संभूष्य पुनः पुष्पै स्समर्चये ।।

श्री अनघा लक्ष्मी समेत श्री अनघ स्वामिने नमः । पुष्पाणि समर्पयामि ।

**कुंकुम पूजा**

देवि त्वा मनघे भद्रे सर्व मङ्गळ मङ्गळे ।

लसत्कुङ्कुम चूर्णेन पूजयामि प्रसीद मे ।।

श्री अनघालक्ष्म्यै नमः । कुंकुमं समर्पयामि ।

**अथ अनघ स्वामिनः - अंग पूजा**

श्री अनघ देवाय नमः - पादौ पूजयामि

श्री त्रिजगत्संचाराय नमः - जंघे पूजयामि

श्री आजानुबाहवे नमः - जानुनी पूजयामि

श्री पद्मासनस्थाय नमः - ऊरूपूजयामि

श्री त्रिगुणेशाय नमः - वळित्रयं पूजयामि

श्री शातोदराय नमः - उदरं पूजयामि

श्री करुणाकराय नमः - हृदयं पूजयामि

श्री भक्तालम्बनाय नमः - बाहू पूजयामि

श्री संगीत रसिकाय नमः - कण्ठं पूजयामि

श्री जगन्मोहनाय नमः - मन्दस्मितं पूजयामि

श्री जगत्प्राणाय नमः - नासिकां पूजयामि

श्री श्रुति संवेद्याय नमः - श्रोत्रे पूजयामि

श्री ध्यानगोचराय नमः - नेत्रद्वयं पूजयामि

श्री तिलकांचित फालाय नमः - फालं पूजयामि

श्री सहस्र शीर्षाय नमः - शिरः पूजयामि

श्री सच्चिदानंदाय नमः - सर्वाण्यंगानि पूजयामि

**अथ अनघा लक्ष्म्याः - अंग पूजा**

श्री अनघा लक्ष्म्यै नमः - पादौ पूजयामि

श्री त्रिजगत्संचारायै नमः - जंघे पूजयामि

श्री आजानुबाहवे नमः - जानुनी पूजयामि

श्री पद्मासनस्थायै नमः - ऊरूपूजयामि

श्री त्रिगुणेशायै नमः - वळित्रयं पूजयामि

श्री शातोदरायै नमः - उदरं पूजयामि

श्री करुणाकरायै नमः - हृदयं पूजयामि

श्री भक्तालम्बनायै नमः - बाहू पूजयामि

श्री संगीत रसिकायै नमः - कण्ठं पूजयामि

श्री जगन्मोहनायै नमः - मन्दस्मितं पूजयामि

श्री जगत्प्राणायै नमः - नासिकां पूजयामि

श्री श्रुति संवेद्यायै नमः - श्रोत्रे पूजयामि

श्री ध्यानगोचरायै नमः - नेत्रद्वयं पूजयामि

श्री तिलकांचित फालायै नमः - फालं पूजयामि

श्री सहस्र शीर्षायै नमः - शिरः पूजयामि

श्री सच्चिदानंदायै नमः - सर्वाण्यंगानि पूजयामि

**<u>श्री अनघ स्वामिनः</u> - <u>षोडश नामानि</u> (16)**

01) श्री अनघाय नमः

02) श्री त्रिविधाघ विदारिणे नमः

03) श्री लक्ष्मीरूपानघेशाय नमः

04) श्री सच्चिदानंद शालिने नमः

05) श्री दत्तात्रेयाय नमः

06) श्री हरये नमः

07) श्री कृष्णाय नमः

08) श्री उन्मत्ताय नमः

09) श्री आनन्द दायकाय नमः

10) श्री दिगम्बराय नमः

11) श्री मुनये नमः

12) श्री बालाय नमः

13) श्री पिशाचाय नमः

14) श्री ज्ञान सागराय नमः

15) श्री महाभय निवारिणे नमः

16) श्री सद्गुरवे नमः

**<u>श्री अनघा लक्ष्म्याः</u> – <u>षोडश नामानि</u> (16)**

01) श्री अनघायै नमः

02) श्री महालक्ष्म्यै नमः

03) श्री योगेशायै नमः

04) श्री योगशक्ति स्वरूपिण्यै नमः

05) श्री तापसी वेष धारिण्यै नमः

06) श्री नानारत्न सुदीप्तये नमः

07) श्री वेदमात्रे नमः

08) श्री शुभायै नमः

09) श्री गृहदायै नमः

10) श्री पत्नीदायै नमः

11) श्री पुत्रदायै नमः

12) श्री सर्वकाम पूरणायै नमः

13) श्री प्रवासि बंधु संयोग दायिकायै नमः

14) श्री लोकमात्रे नमः

15) श्री कार्तवीर्य व्रतप्रीत मतये नमः

16) श्री सर्वसिद्धि कृते नमो नमः

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः, षोडश नाम पूजां समर्पयामि

**<u>धूपः</u>**

नानापरिमळ द्रव्य सम्मेळन मनोहरः ।

धूप स्समर्पितो देवा वनघौ प्रतिगृह्यताम् ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः । धूपमाघ्रापयामि ।

**<u>दीपः</u>**

यद्भासेदं जगद्भाति न दृश्येते तथापि यौ ।

तावुभौ तत्त्व सन्दीप्त्यै दीपै रुद्दीपयाम्यहम् ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः । दीपं दर्शयामि।

**नैवेद्यम्**

राजान्नं बहु भक्ष्याऽऽत्तं नानोपस्कार पुष्कलम् ।

नैवेद्यं श्रुति संवेद्यौ गृह्यता मनघौ मुदा ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः। नैवेद्यं निवेदयामि।

मध्ये मध्ये स्वादूदकं समर्पयामि । हस्तौ प्रक्षाळयामि। पादौ प्रक्षाळयामि।

पुनराचमनीयं समर्पयामि ।

**ताम्बूलम्**

अनघ स्वामि जनक प्रोद्धृताऽऽयुष्य तन्त्रके ।

प्रोक्तै स्सुलक्षणै र्युक्तं ताम्बूलं प्रददेऽनघौ ।।

श्री अनघालक्ष्मी समेत श्री अनघस्वामिने नमः। ताम्बूलं समर्पयामि।

**नीराजनम्**

प्रभो समन्तात् परिवर्तितैः श्री कर्पूर नीराजन दीप माल्यैः ।

युष्म न्महार्चिः परिवेष पंक्तिः किम्मीरिता भा स्त्वनघेऽनघ प्रभो ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः। नीराजनं संदर्शयामि।

नीराजनानन्तरं शुद्धाऽऽचमनीयं समर्पयामि ।।

**मन्त्रपुष्पम्**

यौ वेधसे प्रबल मानस दोषजाल –

मुन्मूल्य सत्वरमभासयतां हि वेदान्।

तावद्य केळि शुनकीकृत वेदजातौ

श्री मन्त्रपुष्प निचयै रनघौ निषेवे ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः। सुवर्णदिव्य मन्त्रपुष्पं समर्पयामि ।।

**प्रदक्षिणम्**

कार्तवीर्याज नहुष भार्गवेंद्रादि रक्षकौ ।
अनघौ लोकपितरौ तुष्येतां मे प्रदक्षिणैः ।।

श्री अनघालक्ष्मी समेत श्री अनघ स्वामिने नमः । प्रदक्षिण नमस्कारान् समर्पयामि ।।

**प्रार्थनम्**

विष्णो अनघ दत्तेश्वरानघे लक्ष्मि मङ्गळे ।
उभौ हि सच्चिदानन्द विग्रहौ भक्तरक्षकौ ।।
युवां मे तुष्यता मद्य पूजया सुप्रसीदताम् ।
ज्ञाताऽज्ञातापराधान्मे क्षमेथां करुणाकरौ ।।
आयु रारोग्य मैश्वर्यं सत्कुटुम्ब प्रवर्धनम् ।
सौमङ्गल्यं यशो विद्यां ज्ञानं च दिशतां मुदा ।।

**समर्पणम्**

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेस्स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ।।

अनेन मया कृतेन अनघा व्रतविधानेन भगवान् सर्वात्मकः, श्री सद्गुरुः प्रीयताम्, सर्वं श्री सद्गुरु चरणारविंदार्पणमस्तु ।।

श्री कार्तवीर्यार्जुनाय नमः (3) (कथा स्थाने)

**<u>दोरबन्धनम्</u> –**

ब्रह्म विष्णु महेशान रूपिन् त्रिगुणनायक ।

त्रैवर्णिक नमस्तुभ्यं तोरदेवानघात्मक ।।

हरिः ओम्

## <u>अनघाव्रत गीतम्</u>

**(अमृतवर्षिणि राग, खंड गति)**

अनघाष्टमी व्रतमुत्तमं भक्तावळी वांछाप्रदम्।

यत्रानघा योगप्रभा दत्तोऽनघो जातस्स्वयम्

सिध्यष्टकं पुत्राऽऽत्मकं संसेव्यते संपूज्यते।

यत्सेवनात् कष्टं गतं पीडावळी शाम्यत्यपि।

उज्जृम्भते शुभ मुन्नतं श्री सच्चिदानन्दाऽऽत्मकम्।।


